# सञ्चारिणी दीपशिखा

सञ्चरति दीपशिखा। तस्या अयम् अष्टमः अङ्कः वेलुडमठस्थितस्य विवेकानन्दस्मृतिमन्दिरस्य ब्रह्मानन्दस्मृतिमन्दिरस्य च शताब्दीसम्पूर्तिम् उपलक्ष्य पवित्रज्यैष्ठामावास्यातिथौ षोडशीदेव्याः पूजादिने प्राकाश्यं नीतः इति प्रमोदस्थानम्। अस्मिन् अङ्के षोडश लेखाः सन्ति।

संस्कृतदर्शनविभागस्य शोधच्छात्रः उत्तमघोषः विवेकानन्दस्वामिपादानां नारीकल्याणचिन्तां सुष्ठु विचार्य स्नेहभाग् भवति। प्राचीनकाले समाजे नारीणां का स्थितिः आसीत्, स्वामिवचनम् अनुसृत्य वर्तमानकाले कथं तासां समुन्नतिः शक्या इत्येते विषयाः निबन्धे तेन विचारिताः।

श्रीरामकृष्णदेवस्य मानसपुत्रत्वेन परिचितस्य ब्रह्मानन्दमहाराजस्य जीवनचरितं बाल्यलीला-साधुसङ्गासक्ति-वैराग्यभावादीनि रमणीयतया वर्णयित्वा प्रशस्यः भवति अस्मद्विभागस्य शोधच्छात्रः प्रलयनन्दी।

गङ्गायां स्थितस्य विविधमतसमन्वयप्रतीकरूपस्य विवेकानन्दमन्दिरस्य निर्माणवृत्तान्तं वर्णयित्वा अस्मद्विभागस्य पूर्वच्छात्रः सम्प्रति केन्द्रियसंस्कृतविश्वविद्यालये संस्कृतभाषाशिक्षकः व्यासदेवमाजी श्लाघ्यो भवति। तस्य च विवेकानन्दमन्दिरस्य स्थापत्यकलां विशिष्य प्रतिपाद्य अस्माकं स्नेहभाक् भवति अस्मद्विभागस्य शोधच्छात्रः शुभदीपदासः।

विभागस्य अपरः शोधच्छात्रः राजेश-अधिकारी, विभागस्य पूर्वच्छात्रः विश्वरूपवेजः च ब्रह्मानन्दमन्दिरस्य निर्माणवृत्तान्तम् उत्कृष्टतया वर्णयित्वा कार्तज्ञ्यभाजौ भवतः।

कठोपनिषदि समुपवर्णितायाः सुप्रसिद्धायाः यमनचिकेतसोः आख्यायिकायाः नाट्यरूपं प्रदाय धन्यवादार्हाः भवन्ति ब्रह्मचारिणः जितेन-रमेन-प्रह्लादवर्याः।

श्रीरामकृष्णपार्षदान्यतमेन सारदानन्दस्वामिना विरचितस्य "भारते शक्तिपूजा" इत्याख्यग्रन्थस्य शक्तितत्त्वपूजापद्धतिनिरूपणाख्यं प्रथमप्रस्तावम् अनूद्य प्रशंसार्हः भवति अस्मद्विभागस्य पूर्वच्छात्रः आवीरलालगङ्गोपाध्यायः।

नवश्लोकमण्डितायाः विवेकस्तुतेः प्रणेता रामकृष्णविद्यामन्दिरस्य शोधच्छात्रः सुमन्तपात्रः प्रशंसावचनैः भूष्यते।

बेलुडमठस्थस्य ब्रह्मचारिप्रशिक्षणकेन्द्रस्य आचार्याः वेदार्थानन्दस्वामिनः रामकृष्णमिशन्-इति संस्थाम् आधाय विनिर्मितस्य "Blooming Lotus of Humanity" इति तथ्यचित्रस्य "मानवतायाः प्रस्फुटितं शतदलम्" इति शीर्षकाङ्कितम् अनुवादं कृत्वा कार्तज्ञ्यभाजः भवन्ति।

अस्मद्विभागस्य सहायकाचार्यः डॉ. गोपीकृष्णन्-रघुः उपजातिच्छन्दनिबद्धं रमणीयं ब्रह्मानन्दषट्कं व्यरचयत्। तस्मै कृतज्ञता विज्ञाप्यते।

सद्गुरुः स्वामी ब्रह्मानन्दः इति शीर्षकाङ्कितं निबन्धं प्रणीय श्लाघार्हो भवति ब्रह्मचारी ईशानचैतन्यः।

विवेकानन्दमन्दिरस्थापनाय ब्रह्मानन्दस्वामिना लिखितस्य आह्वानपत्रस्य संस्कृतानुवादं कृत्वा अस्माकं स्नेहभाक् भवति अस्मद्विभागस्य तृतीयवर्षे अधीयानः शाश्वतझा।

स्वामिगम्भीरानन्देन विरचितस्य स्वामिब्रह्मानन्दचरितस्य संस्कृतानुवादकाय ब्रह्मचारिणे अच्युतचैतन्याय कार्तज्ञ्यं प्रकट्यते।

पूर्वाङ्केषु इव, अस्मिन्नपि अङ्के स्वामिसारदानन्दकृतं श्रीरामकृष्णलीलाप्रसङ्गं

संस्कृतेन अनूद्य धन्यवादार्हो भवति विभागस्य शोधच्छात्रः शान्तनुनायेकः।

अवसरेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीन् आत्मप्रियानन्दस्वामिनः प्रणमामि। अन्येभ्यश्च साह्यम् आचरितवद्भ्यः नामानि अनुच्चार्यैव कार्तज्ञ्यं विज्ञाप्यते।

डॉ. राकेशदाशः
दीपशिखापत्रिकायाः मुख्यसम्पादकः
तथा
विभागाध्यक्षः
संस्कृतदर्शनविभागस्य
रामकृष्ण-मिशन्-शैक्षणिक-शोध-संस्थानस्य
बेलुडमठस्य